किञ्च श्वासबलासकासगुदरुङ्मन्दाग्निहिक्कामरु-
न्मन्यास्तम्भगलामयार्द्दितमलं विष्टम्भबाधा-
मपि ॥"
विषा अतीषा । शक्रद्रुमः ककुभः । देवद्रुमः देव-
दारु ॥ इति द्वात्रिंशदङ्गक्वाथः ॥ * ॥
"मधुना कृष्णाकट्फलकर्कटशृङ्गीभवं चूर्णम् ।
श्वासामये सदोषे लीढ्वा लोकः सुखी भवति ॥
वन्योपलायितापितदावस्याग्नेय पज्वरे दाहः ।
अपहरति श्वासामयमसंशयं भाषितं मुनिभिः ॥"
अथ ज्वरे मूर्च्छायाश्चिकित्सा ।
"आर्द्रकस्य रसैर्नस्यं मूर्च्छायामाचरेन्नरः ।
अञ्जनञ्च प्रयुञ्जीत मधुसिन्धुशिलोषणैः ॥
शीताम्भसाभिषेकः सुरभिर्धूपः सुगन्धिपुष्पञ्च ।
मृदुतालवृन्तवातः कोमलकदलीदलस्पर्शः ॥"
अथ ज्वरे अरुचेश्चिकित्सा ।
"अरुचौ तु शृङ्गवेरजरसकैः साम्लैः ससिन्धुजैः
कवलः ।
सिन्धूत्थमातुलुङ्गीफलकेशरधारणं पक्के ॥"
अन्यच्च ।
"अरुचौ मातुलुङ्गस्य केशरं साज्यसैन्धवम् ।
धात्रीद्राक्षासितानां वा कल्कमास्ये तु
धारयेत् ॥"
अथ ज्वरे छर्द्दिचिकित्सा ।

"क्वाथो गुडूच्याः समधुः सुशीतः
पीतः प्रशान्तिं वमनस्य कुर्य्यात् ।
विश्वचिक्काणां मधुनावलीढा
सचन्दना शर्करयान्विता च ॥"

अथ ज्वरे तृष्णायाश्चिकित्सा ।
"दन्तशठवीजपूरकदाडिमवदरैः सचुक्रकैर्व्वदने ।
लेपो जयति पिपासामथ रजतगुटीमुखान्तःस्था ॥

शीतं पयः क्षौद्रयुतं निपीत-
माकण्ठमाश्वेव तदुद्वमेच्च ।
तर्षप्रकर्षप्रशमाय दद्या-
द्दध्यान्नदक्षौद्रवटाग्रलाजान् ॥"* ॥

अथ ज्वरे अतीसारस्य चिकित्सा ।
"लङ्घनमेकं मुक्त्वा न चान्यदस्तीह भेषजं बलिनः ।
समुदीर्णदोषनिचयं शमयति तत् पाचयत्यपि च ॥

वत्सादनीवत्सकवारिवाह-
विश्वम्भरानिम्बविषाः सविश्वाः ।
ज्वरातिसारं त्वरितं जयन्ति
विश्वामृतावत्सकवारिवाहः ॥"

विश्वम्भरानिम्बो भूनिम्बः ।

"पाठामृतापर्पटमुस्तविश्वा-
किराततिक्तेन्द्रयवान् विपाच्य ।
पिबन् हरत्येव हठेन सर्व्व-
ज्वरातिसारानपि दुर्न्निवारान् ॥"* ॥

अथ ज्वरे विड्ग्रहस्य चिकित्सा ।
"विड्ग्रहे वातजित् कर्म्म कुर्य्याद्वातानुलोमनम् ।
मलं प्रवर्त्तयेदाशु तीक्ष्णाभिः फलवर्त्तिभिः ॥
पथ्यारग्वधतिक्ताचित्रद्राक्षामलकैः शृतं तोयम् ।
जीर्णज्वरे विबन्धे दद्याद्दाश्वेव विड्ग्रहः
शाम्येत् ॥"

अथ ज्वरे हिक्कायाश्चिकित्सा ।

"नीरेण सिन्धूत्थरजोऽतिसूक्ष्मं
नस्येन नूनं विनिहन्ति हिक्काम् ।
शुण्ठी हठाद्वा सितया समेता
धूपोऽथवा हिङ्गुसमुद्भवश्च ॥"* ॥

अथ ज्वरे कासस्य चिकित्सा ।
"कासे कणाकणामूलं कलिद्रुमफलं रजः ।
सविश्वभेषजं लिह्यात् मधुना वा वृषाद्रसम् ॥"
रजः पर्पटकम् ।
"पुष्करमूलकटुत्रिकशृङ्गीकट्फलयासककार-
विकाभिः ।
मधुलुलिताभिरयं खलु लेहः कासरिपुः कफ-
रोगहरश्च ॥"* ॥
अथ ज्वरे दाहस्य चिकित्सा ।
"दाहाधिकारलिखितं दाहे कुर्य्याच्चिकित्सितम् ।
परं ज्वराविरुद्धं यन्मुख्यो नाश्यो ज्वरो यतः ॥"
अथ सुखसाध्यस्य ज्वरस्य लक्षणम् ।
"सन्तापोऽभ्यधिको वाह्यस्तृष्णादीनाञ्च मार्द्दवम् ।
वहिर्व्वेगस्य लिङ्गानि सुखसाध्यत्वमेव च ॥"
तृष्णादीत्यादिशब्देनान्तर्द्दाहसन्ध्यस्थि-व्यथा-
श्वासा गृह्यन्ते । तेषामार्द्दवमल्पता । वहि-
र्व्वेगस्य ज्वरस्य ।
"वर्षाशरद्वसन्तेषु वाताद्यैः प्राकृतः क्रमात् ।
प्राकृतः सुखसाध्यस्तु शरत्सुरभिसम्भवः ॥"
सुरभिर्व्वसन्तः ॥ * ॥
अथ कष्टसाध्यस्य ज्वरस्य लक्षणमाह ।
"वैकृतोऽन्यः स दुःसाध्यः प्राकृतेष्वनिलोद्भवः ॥"
अन्यः प्राकृतादन्यः वैकृतः । * । वर्षादिषु
ज्वरं जनयतां वातादीनां चिकित्साविशेषार्थं
प्राधान्यमप्राधान्यञ्चाह ।
"वर्षासु मारुतो दुष्टः पित्तश्लेष्मान्वितं ज्वरम् ।
कुर्य्यात् पित्तञ्च शरदि तस्य चानुबलः कफः ॥"
तस्य पित्तज्वरस्य चिकित्सामाह ।
"तत्प्रकृत्या विसर्गाच्च तत्र नानशनाद्भयम् ॥"
तत्प्रकृत्या तस्य पित्तस्य प्रकृत्या स्वभावेन ।
यत उक्तम् ।
"कफपित्ते द्रवे धातू सहेते लङ्घनं वहु ॥" इति ।
विसर्गाच्च शरदो विसर्गकालत्वाच्च । यत उक्तम् ।
वर्षाशरद्धेमन्ता विसर्गाः कालास्तत्रोपचितबला-
प्राणिनो भवन्ति सोमस्य बलवत्त्वादिति । तत्र
शरदि पित्तज्वरे अनशनाद्भयं न । कफो वसन्ते
तमपि वातपित्तं भवेदनु । वसन्ते कफज्वरेऽपि
कफप्रकृत्या लङ्घनाद्भयं न भवति । किन्तु
वसन्तस्यादानकालत्वात् निःशङ्कं न कर्त्तव्यम् ।
यत उक्तम् । शिशिरवसन्त-ग्रीष्मास्त्वादानकालाः
स्तत्रापचितबलाः प्राणिनो भवन्ति सूर्य्यस्य
बलवत्त्वादिति । एतेनेदं उक्तम् । वर्षासु वायुः
प्रधानं पित्तश्लेष्माणावप्रधाने । शरदि पित्तं
प्रधानं कफोऽप्रधानम् । वसन्ते श्लेष्मा प्रधानं
वातपित्ते अप्रधाने । तत्र प्रधानस्य प्राधा-
न्येन चिकित्सा कर्त्तव्या । सा चाप्रधाना
निषिद्धा विधेया । एवं वैकृतेष्वपि प्रधा-
नस्य प्राधान्येन चिकित्सा कर्त्तव्या । तथा
चोक्तम् ।
"संसर्गे यो गरीयान् स्यादुपक्रम्य स वै भवेत् ।
शेषदोषाविरोधेन सन्निपाते तथैव च ॥"
संसर्गे दोषद्वयस्य संसर्गे । गरीयान् प्रधानः ।
"अन्तर्द्दाहोऽधिका तृष्णा प्रलापः श्वसनं भ्रमः ।
सन्ध्यस्थिशूलमस्वेदो दोषवर्च्चोविनिग्रहः ॥
अन्तर्व्वेगस्य लिङ्गानि कष्टसाध्यत्वमेव च ॥"
वर्च्चोविनिग्रहः पुरीषाप्रवृत्तिः ॥ * ॥
अथासाध्यस्य ज्वरस्य लक्षणमाह ।
"ज्वरः क्षीणस्य शूलस्य गम्भीरो दैर्घ्यरात्रिकः ।
असाध्यो बलवान् यश्च केशसीमन्तकृत् ज्वरः ॥"
दैर्घ्यरात्रिकः बहुरात्रानुबन्धी । केशसीमन्तकृत्
प्रभावात् केशेषु सीमन्तं यः करोति ॥ * ॥
गम्भीरस्य लक्षणमाह ।
"गम्भीरस्तु ज्वरो ज्ञेयो ह्यन्तर्द्दाहेन तृष्णया ।
आनद्धत्वेन चात्यर्थं कासश्वासोद्गमेन च ॥"
आनद्धत्वेन विबद्धमलत्वेन ॥ * ॥ सामान्य-
ज्वरेऽपि कर्णमूलशोथस्यासाध्यत्वादिकमाह ।

"ज्वरस्य पूर्व्वं ज्वरमध्यतो वा
ज्वरान्ततो वा श्रुतिमूलशोथः ।
क्रमादसाध्यः खलु कृच्छ्रसाध्यः
सुखेन साध्यो मुनिभिः प्रदिष्टः ॥"* ॥

अथारिष्टमाह । तत्रारिष्टस्य लक्षणम् ।
"रोगिणो मरणं यस्मादवश्यम्भावि लक्ष्यते ।
तल्लक्षणमरिष्टं स्याद्रिष्टमप्यभिधीयते ॥
हेतुभिर्बहुभिर्जातो वहुभिर्बहुलक्षणः ।
ज्वरः प्राणान्तकृद्यश्च शीघ्रमिन्द्रियनाशनः ॥"
शीघ्रमिन्द्रियनाशनः उत्पन्नमात्र एव चिकित्-
स्यमानोऽपीन्द्रियाणां चक्षुरादीनां शक्तिं यो
नाशयति ॥ * ॥ अन्यच्चारिष्टमाह ।
"विसंज्ञस्ताम्यते यस्तु शेते निपतितोऽपि वा ।
शीतार्द्दितोऽन्तरुष्णश्च ज्वरेण म्रियते नरः ॥"
विसंज्ञः विगतज्ञानः । ताम्यते नष्टहर्षः । शेते
निपतितोऽपि वा अत्रापिशब्द एवार्थः निप-
तित एव तिष्ठति न चोत्थातुं समर्थः तथा सन्
शेत एव । शीतार्द्दितः वहिः । अन्तरुष्णः
अन्तर्द्दाहवान् ॥ * ॥ अन्यच्च ।
"यो हृष्टरोमा रक्ताक्षो हृदि सङ्घातशूलवान् ।
वक्त्रेण चैवोच्छ्वसिति ज्वरस्तं हन्ति मानवम् ॥"
हृष्टरोमा रोमाञ्चवान् । हृदि सङ्घातशूलवान्
सान्निपातिकशूलवान् । वक्त्रेण चैवोच्छ्वसिति
न तु नासिकया ॥ * ॥ अन्यच्च ।
"हिक्काश्वासतृषायुक्तं मूढं विभ्रान्तलोचनम् ।
सन्ततोच्छ्वासिनं क्षीणं नरं क्षपयति ज्वरः ॥"
क्षपयति समापयतीत्यर्थः ॥ * ॥ अन्यच्च ।
"हतप्रभेन्द्रियं क्षाममरोचकनिपीड़ितम् ।
गम्भीरतीक्ष्णवेगार्त्तं ज्वरितं परिवर्ज्जयेत् ॥"
हता प्रभा दीप्तिर्येषाम् । अथवा हता प्रभा
प्रतिभा विषयग्रहणशक्तिर्येषां तथाविधानीन्द्रि-
याणि यस्य तं हतप्रभेन्द्रियम् । क्षामं क्षीणम् ।
गम्भीरतीक्ष्णवेगार्त्तं गम्भीरः उक्तलक्षणः